चतुर्दशः पाठः

# राष्ट्रबोधः

[प्रस्तुतलघुकथा संवेदनशीलानां किशोराणां गुणानां विकासाय प्रभावोत्पादकं कथानकं चित्रयति। समाजस्य राष्ट्रस्य च निर्माणे सर्वेषां नागरिकाणां महती भूमिका भवति। सदा जागरूकस्य नागरिकस्य प्रयासः राष्ट्रगौरवाय प्रवर्तते। राष्ट्रबोधेन सम्पृक्तानां जनानां लघुप्रयत्नः अपि महत्कार्यं साधयति इत्येव सन्देशं वितरतीयं लघुकथा।]

विवेकः धनञ्जयेन सह विद्यालयं गच्छन् आसीत्। तौ यावदेव किञ्चिद्दूरं गतौ तावदेव जलाप्लावनेन मग्नं मार्गं दृष्ट्वा चिन्ताकुलौ जातौ। आतपे तिष्ठन्तौ उभौ पिपासया आकुलितावभवताम्। धनञ्जयः आपणात् रेलनीरं क्रीत्वा स्वयं पीत्वा विवेकं च पाययति। ततो धनञ्जयस्तां जलकूपीं पार्श्वे अमर्दितामेव क्षिप्तवान्। धनञ्जयस्य एतदनुचितं कार्यं यावद् विवेकः निन्दितुम् आरभते तावत् यायावरः कश्चित् बालकः तत्रागत्य तां कूपीम् उत्थाप्य स्वस्यूते निगूढवान् आसीत्।

तं तया कुर्वन्तं वीक्ष्य विवेकः स्वनेत्रे रक्ते कुर्वन् तर्जयँश्च पृच्छति– "अरे दुष्ट! कस्त्वम्! एतत् समाजविरोधि कार्यं कथं करोषि?तिष्ठ त्वामहम् आरक्षिणे समर्पयामि। बालकः सभयं कम्पमानः निवेदयति– . .... हं हं स्वामिन्! अहं विजयः, मा मां तर्जयतु! निर्धनतया इतस्ततः विचरन् एकैकां कूपीं चित्वा चोरविपणौ विक्रीय अल्पधनञ्च प्राप्य यथा–तथा उदरज्वालां शमयामि। क्षम्यताम्! यदि भवान् तर्जयितुम् इच्छति साहसं च धारयति तर्हि तान् ........ तर्जयतु .......। "कान् ....? रे दुष्ट! वद! वद! " इति पृष्टवान् विवेकः।

विजयः निःश्वस्य प्रत्यवदत्– अहं यत् स्थानं सङ्केतं च निदर्शयामि तत्र गत्वा विकृतवस्तु–निर्माणरतान् तान् देशद्रोहिणः तर्जयतु। बालकस्य विजयस्य वचः श्रुत्वा आश्चर्यचकितौ विवेकः धनञ्जयश्च तस्य प्रशंसां कुरुतः। तथा च तं पठितुं प्रेरयतः। सोऽपि विवेकस्य धनञ्जयस्य मतेन प्रभावितः पठितुं प्रतिज्ञाय स्वसङ्केतं प्रदाय धन्यवादं च विज्ञाप्य प्रस्थितः। अथ तेन बालकेन निर्दिष्टं सङ्केतं चादाय इमौ छात्रौ नौकाम् आरुह्य विद्यालयं गतवन्तौ।

विवेक: धनञ्जयश्च स्वविद्यालयं विलम्बेन प्रविष्टौ। वर्गाध्यापक: विलम्बस्य कारणं ज्ञातुम् ऐच्छत्। तयो: छात्रयो: कथनं श्रुत्वा वर्गाध्यापक: उद्वेलित: सञ्जात:।

अथ स तौ नीत्वा प्राचार्यकार्यालयं प्रविष्ट:। शिक्षक: विवेक–धनञ्जययो: वृत्तान्तं प्राचार्यम् अश्रावयत्। प्राचार्य: गम्भीरतया विचारयन् आरक्षिस्थानकं सूचितवान्। आरक्षिण: तत्र कुत्सितकर्मरतानां राष्ट्रद्रोहिणां सङ्के.तं स्थानं च गुप्तरीत्या परित: संवृत्य सावधानतया एकैकवस्तुन: परीक्षणं कृतवन्त:। तस्मिन् क्रमे विकृतानाम् औषधानां तैलानां खाद्यानां चोष्याणां पेयानां च पदार्थानां प्रभूतराशिं प्राप्तवन्त:।

तत्रैव आतङ्क.वादिनां पत्रसङ्के.तादिकं विकृतरूप्यकाणि, साहित्यानि च उपलब्धानि। सूक्ष्मनिरीक्षणेन अस्मिन् षड्यन्त्रे समाजस्य अनेके बहि:सभ्याश्च लिप्ता: प्रतीता:। आरक्षिनिरीक्षक: शीघ्रमेव उच्चाधिकारिण: सूचयित्वा तेषां निर्देशं च प्राप्य तान् राष्ट्रद्रोहिण: विकृतवस्तुनिर्माणे संलग्नान् निगृह्य कारागारं प्रेषितवान्। आरक्षिप्रशासनम् अस्य अभियानस्य प्रेरकौ विवेकं धनञ्जयं च पुरस्कृतौ अकरोत्।

अथ राजकीये शिक्षकदिवससमारोहे विद्यालयस्य प्राचार्यं वर्गाध्यापकं विवेकं धनञ्जयं विजयं च सगौरवं सबहुमानं समादृत्य मुख्यमंत्री समबोधयत्– "देव्य:! सज्जनाश्च! अद्य वयं विवेकस्य धनञ्जयस्य विजयस्य च समाजबोधेन राष्ट्रबोधेन च आनन्दम् अनुभवाम:। अस्माकं छात्रा: शिक्षकाश्च यदि सुसंस्कृता भवन्ति तर्हि सर्वविधसमस्यानां निवारणं सुकरं वर्तते। अद्य छात्रसहयोगेन राष्ट्रद्रोहिण: निगृहीता: सन्ति। एकैक: नागरिक: एवमेव आचरेत् तर्हि अस्माकं समाजस्य राष्ट्रस्य च उपरि यत् सङ्क.टम् अस्ति तस्य निवारणं भवेत्। यद्येकोऽपि जन: मार्गं दूषितं कुर्वन्तं, वृक्षं छिन्दन्तं, देशविरोधिना सह षड्यन्त्रं रचयन्तं राष्ट्रविरोधे च जनं, जनसमूहं सङ्घटनं च रोधयति, यथासम्भवं च आरक्षिभ्य: समर्पयति तर्हि तस्य महती देशभक्ति: स्यात्, तस्य महान् राष्ट्रबोधश्च स्यात्। अस्माभि: राष्ट्रभक्तै: भवितव्यम्। एतदर्थं राष्ट्रबोध: अपेक्षित:। उक्तञ्च

**य: समाजस्य देशस्य सर्वकालेषु यत्नत: ।**

**रक्षां करोति तस्यैव राष्ट्रबोध: प्रशस्यते ॥**

## शब्दार्थाः

| | | |
|---|---|---|
| **तावदेव** | तस्मिन् एव काले | उसी समय |
| **यावदेव** | यस्मिन् एव काले | जैसे ही |
| **जलाप्लवनेन** | जलवृद्धिद्वारा | बाढ़ से |
| **पिपासया** | जलं पातुम् इच्छया | प्यास से |
| **जलकूपीम्** | जलस्य वर्तुलाकार-पात्रविशेषम् | जल के बोतल को |
| **पार्श्वे** | समीपे | बगल में, पास में |
| **अमर्दिताम्** | अपिष्टाम् | बिना तोड़े-मोड़े |
| **क्षिप्तवान्** | अक्षिपत् | फेंक दिया |
| **स्वस्यूते** | वस्त्रनिर्मित-स्वकोषे, स्वपोटलिकायाम् | अपने थैले में |
| **निगूढवान्** | गुप्तरूपेण स्थापितवान् | छिपा कर रख लिया |
| **आरक्षिणे** | आरक्षकाय | पुलिसवाले को |
| **चोरविपणौ** | चौरापणे | चोर बाजार में |
| **उदरज्वालाम्** | बुभुक्षाम्, जठराग्निम् | पेट की आग (भूख) को |
| **विकृतवस्तुनिर्माणरतान्** | अशुद्धपदार्थानां निर्माणे संलग्नान् | नकली सामान बनाने वालों को |
| **चोष्याणाम्** | चोषयितुं योग्यानाम् | चूसने योग्य पदार्थों का |
| **सुकरम्** | सुखेन कर्त्तुम् योग्यम् | आसानी से करने योग्य |
| **समादृत्य** | सम्यक् आदृत्य | बहुत आदर कर के |

## व्याकरणम्

| | | |
|---|---|---|
| **सम्पृक्तानाम्** | - | सम् + Öपृच् + क्त |
| **गच्छन्** | - | Öगम् + शतृ |
| **दृष्ट्वा** | - | Öदृश् + क्त्वा (अव्ययम्) |
| **चिन्ताकुलौ** | - | चिन्तया आकुलौ (तृतीया तत्पुरुष) |

| | | |
|---|---|---|
| **तिष्ठन्तौ** | – | Öस्था + शतृ (पुं० प्रथमा द्वि० व०) |
| **क्रीत्वा** | – | Öक्री + क्त्वा |
| **पीत्वा** | – | Öपा + क्त्वा |
| **निन्दितुम्** | – | Öनिन्द + तुमुन् (अव्ययम्) |
| **तत्रागत्य** | – | तत्र + आगत्य |
| **आगत्य** | – | आ + Öगम् + ल्यप् (अव्ययम्) |
| **उत्थाप्य** | – | उद् + Öस्था + ल्यप् (अव्ययम्) |
| **निगूढवान्** | – | नि + Öगुह् + क्तवतु (पुं०, एकवचन) |
| **कुर्वन्तम्** | – | Öकृ + शत् (पुं०, द्वि०, एकवचन) |
| **वीक्ष्य** | – | वि + Öईक्ष् + ल्यप् (अव्ययम्) |
| **तर्जयन्** | – | तर्ज् + णिच् + शतृ (पुं०, प्रथमा, एकवचन) |
| **कुर्वन्** | – | Öकृ + शतृ (पुं०, प्रथमा, एकवचन) |
| **कम्पमानः** | – | Öकम्प् + शानच् (पु., प्र. वि., ए.व.) |
| **विक्रीय** | – | वि + Öक्री + ल्यप् (अव्ययम्) |
| **विचरन्** | – | वि + ⊠चर् + शतृ (पुं०, प्रथमा, एकवचन) |
| **चित्वा** | – | Öचि + क्त्वा (अव्ययम्) |
| **तर्जयितुम्** | – | तर्ज् + तुमुन् (अव्ययम्) |
| **प्रतिज्ञाय** | – | प्रति + Öज्ञा + ल्यप् |
| **प्रदाय** | – | प्र + Öदा + ल्यप् |
| **विज्ञाप्य** | – | वि + Öज्ञा + णिच् + ल्यप् |
| **निर्दिष्टम्** | – | निः + दिश् + क्त |
| **चादाय** | – | च + आदाय |
| **आदाय** | – | आङ् + Öदा + ल्यप् |
| **गतवन्तौ** | – | Öगम् + क्तवतु (प्रथमा, द्विवचन) |

**प्रविष्टौ** - प्र + Öविश् + क्त (पुं०, प्रथम द्विवचन)

**सूचितवान्** - सूच् + क्तवतु (पुं०)

**विचारयन्** - वि + Öचर् + णिच् + शतृ (पुं० प्रथमा)

**खाद्यानाम्** - Öखाद् + ण्यत् (षष्ठी, बहुवचन)

**चोष्याणाम्** - Öचुष + ण्यत्

**पेयानाम्** - Öपा + यत् (ष० वि०, ब० व०)

**प्राप्तवन्तः** - प्र + Öआप् + क्तवतु

**भवितव्यम्** - भू + तव्यत्

**निगृह्य** - नि + Öग्रह् + ल्यप्

**आरक्षिप्रशासनम्** - आरक्षिणां प्रशासनम् (षष्ठी तत्पुरुष)

**प्रशासनम्** - प्र + Öशास् + ल्युट्

**देशभक्तिः** - देशाय भक्तिः (च० तत्पुरुष)

**छिन्दन्तम्** - Öछिद् + शतृ

**भाषमाणम्** - Öभाष् + शानच्

## अभ्यासः ( मौखिकः )

1. **एकपदेन संस्कृतभाषया उत्तरं वदत–**

(क) धनञ्जयेन सह विद्यालयं कः गच्छन् आसीत्?

(ख) मार्गः केन मग्नः जातः आसीत्?

(ग) यायावरः बालकः कूपीम् उत्थाप्य कुत्र निगूढवान्?

(घ) छात्राः शिक्षकाश्च कस्मिन् समारोहे सम्मानिताः?

(ङ) यः देशस्य रक्षां करोति तस्य किं प्रशस्यते?

## अभ्यासः ( लिखितः )

1. एकपदेन संस्कृतभाषया उत्तरं लिखत–

(क) आतपे तिष्ठन्तौ तौ कया पीडितौ अभवताम्?

(ख) धनञ्जयः आपणात् किं क्रीतवान्?

(ग) विवेकः धनञ्जयस्य किं कार्यं निन्दति?

(घ) बालकः विवेकं कान् जनान् तर्जयितुं निवेदयति?

(ङ) प्राचार्यः किम् सूचितवान्?

2. पूर्णवाक्येन उत्तरं प्रदत्त–

(क) तं बालकं तथा कुर्वन्तं वीक्ष्य विवेकः स्वनेत्रे रक्ते कुर्वन् किमुक्तवान्?

(ख) यायावरः बालकः कयोः मतेन प्रभावितः भूत्वा किं किं कृत्वा प्रस्थितः?

(ग) आरक्षिनिरीक्षकः कान् सूचयित्वा केषां च निर्देशं प्राप्य कान् कारागारं प्रेषितवान्?

(घ) मुख्यमंत्री केन कारणेन आनन्दम् अनुभवति?

(ङ) सर्वासां समस्यानां निवारणं कथं सम्भाव्यते?

3. उदाहरणानुसारं कोष्ठके लिखितं शुद्धमेकं पदं स्वीकृत्य प्रश्ननिर्माणं कुरुत–

उदाहरणम् उत्तरम् – **विवेकः धनञ्जयेन सह विद्यालयं गच्छन् आसीत्।**

**प्रश्नः – विवेकः केन सह विद्यालयं गच्छन् आसीत्?**

(क) उत्तरम्– धनञ्जयः तां कूपीम् उत्थाप्य पार्श्वे क्षिप्तवान्।

प्रश्नः– ............................................................ (**कुत्र/अत्र**)

(ख) उत्तरम्– यायावरः वस्तुसंग्राहकः मलिनवस्त्रः बालकः तत्र आगतः।

प्रश्नः– ............................................................ (**का/कः**)

(ग) उत्तरम्– तिष्ठ! त्वामहम् आरक्षिणे समर्पयामि।

प्रश्नः– ............................................................ **(कस्मै/कस्यै)**

(घ) उत्तरम्– आरक्षिप्रशासनम् अभियानस्य प्रेरकौ पुरस्कृतौ अकरोत्।

प्रश्नः– ............................................................ **(के/कौ)**

(ङ) उत्तरम्– अहं कूपीं चित्वा अल्पधनं प्राप्य यथा तथा उदरज्वालां शमयामि।

प्रश्नः– ............................................................ **(कम्/काम्)**

**4. रेखाङ्कि.तपदानां स्थाने उदाहरणानुसारं विलोमपदानि योजयित्वा वाक्यानि रचयत।**

**उदाहरणम्– देशद्रोहिणः देशस्य अहितं कुर्वन्ति।**

**उत्तरम्– देशप्रेमिणः देशस्य हितं कुर्वन्ति।**

अ. प्रश्न– अधमाः जनाः समाजविरोधि कार्यं कुर्वन्ति।

उत्तरम्– ............................................................

आ. प्रश्न– असभ्याः अशिष्टाश्च अवैधं कर्म सम्पादयन्ति।

उत्तरम्– ............................................................

इ. प्रश्न– निर्धनः अल्पधनमपि प्राप्य जीवनयापनं करोति।

उत्तरम्– ............................................................

ई. प्रश्न– प्रामाणिकवस्तूनां सेवनेन स्वास्थ्यं सुरक्षितं भवति।

उत्तरम्– ............................................................

उ. प्रश्न– राष्ट्रस्य रक्षकः सम्मानेन पुरस्कृतः भवति।

उत्तरम्– ............................................................

5. **प्रश्नः - लिखितपदेषु अन्यविभक्तिं योजयित्वा समुचितं वाक्यं रचयत–**

**उदाहरणम् - राष्ट्रबोधः, राष्ट्रम्/ बालकः**

**उत्तरम् – बालकानां राष्ट्रबोधेन राष्ट्रस्य सुरक्षा भवति।**

(क) प्रश्नः– जलाप्लावनम्/ मार्गे / भग्नेन

(ख) प्रश्नः– सज्जनः/ चौरम्/ आरक्षी

(ग) प्रश्नः– शिक्षकः/ समारोहः/ पुरस्कृतः

(घ) प्रश्नः– प्राचार्येण/ आरक्षिस्थानके/ गम्भीरता

(ङ) प्रश्नः– विवेकाः/ धनञ्जयः/ विद्यालयः

6. **निम्नवाक्येषु अधोरेखाङ्कि.पयदानां सन्धिविच्छेदं कुरुत–**

(क) शिक्षकः प्रश्नोत्तरं श्रुत्वा प्रसन्नः भवति।

(ख) यस्यैव छात्रस्य परिश्रमः तस्यैव सफलता।

(ग) यस्योपरि दायित्वं भवति तस्य चिन्तापि।

(घ) कस्ते पिता?यस्य पुत्रस्तु त्वं भोः।

(ङ) जगदिदं रचितं जगदीशेन।

## योग्यता-विस्तारः

1. आधुनिकपरिवेशम् आधृत्य रचिता इयं कथा छात्रेषु सामाजिकं राष्ट्रियं च कर्तव्यं प्रति समुत्साहं जनयति। इयं प्रेरिका कथा न केवलं छात्राणां कृते अपितु सर्वेषां कृते उपयोगिनी। अतः अस्याः श्रवणं श्रावणं वा समुचितं वर्तते।

2. **आधुनिक-संस्कृत-कथा-परम्परा–** आधुनिके काले बहवः कथाकाराः नूतनभाव-दृश्यानि आश्रित्य कथां लिखन्ति। राजेन्द्रः मिश्रः, जनार्दन हेगडे, केशवचन्द्र दाशः, मिथिलेश कुमारी मिश्रा, वैद्यनाथ मिश्रश्चेत्यादयः प्रख्याताः सन्ति। अन्येषां कथाकाराणाम् अपि महती सूची

अस्ति। संस्कृत- शिक्षकस्य सहयोगेन सम्भाषणसन्देश संस्कृतमञ्जरीप्रभृतिपत्रिकासु अन्वेषणं कृत्वा कथाया: शैली, विषय:, सौन्दर्यम्, सन्देश: च ज्ञातव्या:।

## 3. कथाया: व्यावहारिक: सन्देश:

शिक्षाया: यथा भौतिकरूपेण प्रसार: भवति तथा संस्कार: अपि भवेत्। किन्तु सम्प्रति समाजे संस्कारस्य अभाव: दृश्यते। अनया कथया बालानां युवकानां महिलानां पुरुषाणां च सर्वेषां व्यक्तिगतदायित्वस्य पारिवारिकदायित्वस्य, पारिवेशिकदायित्वस्य, सामाजिकदायित्वस्य, राष्ट्रियदायित्वस्य, सम्पूर्णमानवीयदायित्वस्य च समग्रविकास: भवेत्, तदनुसारम् सर्वत्र व्यवहार: अपि भवेत्। एवं यदि क्रियान्वयनं भवति तर्हि भारतदेश: विश्वगुरु: भविष्यति। शिक्षकस्य निर्देशेन संस्कारसम्बन्धे गोष्ठी करणीया।

**(क) क्रियाया: सातत्य-बोधनम्** परस्मैपदधातुभ्य: शतृप्रत्यय: प्रयुज्यते। आत्मनेपदधातुभ्यश्च शानच् प्रत्यय: प्रयुज्यते । शतृप्रत्ययस्य शानच्-प्रत्ययस्य च रूपाणि विशेष्यम् अनुसृत्य प्रवर्तन्ते। यथा-

| | पुंल्लिंगे | स्त्रीलिङ्गे. | नपुंसके |
|---|---|---|---|
| Öगम् + शतृ = गच्छत् | गच्छन् | गच्छन्ती | गच्छत् |
| Öअस् + शतृ = सत् | सन् | सती | सत् |
| Öपठ् + शतृ = पठत् | पठन् | पठन्ती | पठत् |
| Öकृ + शतृ = कुर्वत् | कुर्वन् | कुर्वती | कुर्वत् |
| Öभू + शतृ = भवत् | भवन् | भवन्ती | भवत् |
| Öलभ् + शानच् = लभमान | लभमान: | लभमाना | लभमानम् |
| Öवृत् + शानच् = वर्तमान | वर्तमान: | वर्तमाना | वर्तमानम् |
| Öमुद् + शानच् = मोदमान | मोदमान: | मोदमाना | मोदमानम् |
| ÖÖकृ + शानच् = कुर्वाण | कुर्वाण: | कुर्वाणा | कुर्वाणम् |
| Öकम्प् + शानच् = कम्पमान | कम्पमान: | कम्पमाना | कम्पमानम् |

एतेषां शतृप्रत्ययान्तप्रयोगाणां रूपाणि पुल्लिङ्गे. भवन् इति, स्त्रीलिङ्गे. नदीवत् नपुंसकलिङ्गे. च जगद् वत् चलन्ति।

**यथा- पु०**

| | | | |
|---|---|---|---|
| **प्र०:-** | गच्छन् | गच्छन्तौ | गच्छन्तः |
| **द्वि०:-** | गच्छन्तम् | गच्छन्तौ | गच्छतः |

**स्त्री०**

| | | | |
|---|---|---|---|
| | गच्छन्ती | गच्छन्त्यौ | गच्छन्त्यः |
| | गच्छन्तीम् | गच्छन्त्यौ | गच्छन्तीः |

**नपुंसक**

| | | | |
|---|---|---|---|
| | गच्छत् | गच्छती | गच्छन्ति |
| | गच्छत् | गच्छती | गच्छन्ति |

पुनः शानच् प्रत्ययानां रूपाणि पुल्लिङ्गे. रामवत् स्त्रीलिङ्गे. लतावत् नपुंसके च फलवत् चलन्ति।

**यथा– पु०**

| | | | |
|---|---|---|---|
| | मोदमानः | मोदमानौ | मोदमानाः |
| | मोदमानम् | मोदमानौ | मोदमानान् |
| **स्त्री०** | मोदमाना | मोदमाने | मोदमानाः |
| | मोदमानाम् | मोदमाने | मोदमानाः |
| **नपुं०** | मोदमानम | मोदमाने | मोदमानानि |
| | मोदमानम् | मोदमाने | मोदमानानि |